सात्र तिष्ठति मत्प्रीत्या अष्टधा दिक्षु संस्थिता।
मङ्गला वटमूले तु पश्चिमे विमला तथा ।
शङ्खस्य पूर्व्वभागे तु संस्थिता सर्व्वमङ्गला ॥
अर्द्धाशनी तथा लम्बा कुवेरदिशि संस्थिता ।
कालरात्रिर्दक्षिणस्यां पूर्व्वस्यान्तु मरीचिका ॥
कालरात्र्यास्तथा पश्चात् चण्डरूपा व्यवस्थिता।
रुद्राण्याश्चाष्टधा भेदं दृष्ट्वा रुद्रोऽपि शङ्करः।
आत्मानमष्टधा भित्त्वा उपास्ते परमेश्वरम् ॥
कपालमोचनं नाम क्षेत्रपालं यमेश्वरम् ।
मार्कण्डेयं तथेशानं विश्वेशं नीलकण्ठकम् ॥
वटमूले वटेशञ्च लिङ्गान्यष्टौ महेशितुः ।
यानि दृष्ट्वा तथा स्तुत्वा पूजयित्वा विमुच्यते ॥”
तत्र जगन्नाथस्याविर्भावकारणम् ।

जैमिनिरुवाच ।

“इन्द्रद्युम्नस्य नृपतेः क्षेत्रे श्रीपुरुषोत्तमे ।
जगदीशप्रसादाय पितामहनिदेशतः ॥
एकोनं क्रमशः संख्यामवाप पृथिवीपतेः ॥
सहस्रं हयमेधस्य यथावद्विधिनोदितम् ।
कृत्वा सप्तदिनात् पूर्व्वं या रात्रिरभवद्द्विजाः!॥
तस्यास्तुरीयप्रहरे ध्यायतो विष्णुमव्ययम् ।
ध्याने तस्मिन् ददर्शासौ महाभाग्यवशान्नृपः ।
प्रत्यक्षमिव च श्वेतद्वीपं स्फाटिकनिर्म्मितम् ।
तन्मध्ये ददृशे देवं शङ्खचक्रगदाधरम् ॥
नीलजीमूतसङ्काशं वनमालाविभूषितम् ।
दक्षपार्श्वे स्थितं तस्य अनन्तं धरणीधरम् ॥
हललाङ्गलशङ्खाब्जस्फुरद्बाहुचतुष्टयम् ।
दक्षपार्श्वे स्थितां विष्णोर्लक्ष्मीं तां शुभलक्षणाम्॥
वराभयाब्जहस्तां वै कुङ्कुमाभां सुलोचनाम् ।
ददर्श पद्मासनगां लावण्याम्बुधिपुत्त्रिकाम् ॥
पितामहञ्च ददृशे पुरतोऽस्य कृताञ्जलिम् ।
वामपार्श्वस्थितं चक्रं सर्व्वज्ञानमयं विभोः ॥
ततः प्रवृत्ते कृत्या नृपतेर्वाजिमेधिका ।
शस्तैः स्तोत्रैर्दिव्यदृग्भिर्वर्णक्रमसमुज्ज्वलैः ॥
दक्षिणे तटभूदेशे विश्वेश्वरसमीपतः ।
नियुक्ताः सेवका राज्ञा ससम्भ्रममुपस्थिताः ॥
न्यवेदयन्तो नृपतिं कृताञ्जलिपुटा द्विजाः ।
देव ! दृष्टो महावृक्षस्तटभूमौ महोदधेः ॥
प्रविष्टाग्रसमुद्रान्तकल्लोलप्लवमूलकः ।
माञ्जिष्ठवर्णः सर्व्वत्र शङ्खचक्राङ्कितः शुभन् ॥
न दृष्टपूर्व्वो वृक्षोऽयमुद्यत्सूर्य्यनिभांशुना ।
नियुक्तानां वचः श्रुत्वा राजा नारदमब्रवीत् ॥
तत् किं निमित्तं यद्वृक्षं नरश्रेष्ठं वदन्ति ते ।
नारदः प्रहसन् वाक्यमुवाच नृपसत्तमम् ॥
उपस्थितन्तु ते भाग्यं स्वप्ने यद्दृष्टवान् पुरा ।
श्वेतद्वीपे विश्वमूर्त्तिर्दृष्टो यो विष्णुरव्ययः ॥
तदङ्गस्खलितं लोम तरुत्वमुपपद्यते ।
तद्भाग्यवशगः सर्व्वलोकानां नयनातिथिः ॥
भविष्यति महाराज ! सर्व्वकल्मषनाशनः ।
समाप्यावभृथस्नानं तटान्ते सरितां पतेः ॥
उत्सवं समहत् कृत्वा कृतकौतुकमङ्गलम् ।
महावेद्यां स्थापयाच यत्नेशं तरुरूपिणम् ॥
विचार्य्येत्थं तदा युक्तौ तौ च नारदभूभुजौ ।
सुसन्नद्धौ ततो यातौ यत्रासौ भगवान् द्रुमः ॥
पुनः पुनः प्रणम्यैनं हर्षाश्रुनयनो नृपः ।
द्विजैराहारयामास तरुं कल्लोललोडितम् ।
स्रग्गन्धालेपनं दिव्यं महावेद्यां विनिन्यतुः ।
वचसा नारदस्यैनं पूजयामास पार्थिवः ॥
पूजावसाने पप्रच्छ नारदं मुनिसत्तमम् ।
कीदृशीं प्रतिमां विष्णोर्घटयिष्यति कः पुनः ॥
विचारयन्तौ तावित्थं यावन्नारदपार्थिवौ ।
अशरीरां ततो वाणीं शुश्राव चान्तरीक्षतः ॥
अपौरुषेयो भगवान् सद्विचारपथे स्थितः ।
सुशुभ्रायां महावेद्यां स्वयं सोऽवतरिष्यति ॥
प्रच्छाद्यतां दिनान्येव यावत् पञ्चदशानि वै ।
उपस्थितोऽयं यो वृद्धः शस्त्रपाणिस्तु वर्द्धकी ॥
एनमन्तः प्रवेश्यैव द्वारं बध्नन्तु यत्नतः ।
बहिर्वाद्यानि कुर्व्वन्तु यावत्तु घटना भवेत् ॥
श्रुतस्तद्घटनाशब्दो वाधिर्य्यान्धत्वदायकः ।
नरके वसतिञ्चैव कुर्य्यात् सन्ताननाशनम् ॥
नान्तः प्रवेशनं कुर्य्यान्न पश्येच्च कदाचन ।
नियुक्तान्यः प्रपश्येच्चेन्नाशो राष्ट्रस्य चैव हि ॥
दृष्टुश्चापि महाभीतिरन्धता च युगे युगे ।
तच्छ्रुत्वा नारदाद्यास्ते यथोक्तं विष्णुना स्वयम्॥
चिकीर्षन्ति तथा कर्त्तुं तत्रायातस्तु वर्द्धकी ।
प्रोवाच नृपतिं सोऽथ स्वप्ने दृष्टास्तु यास्त्वया ॥
ता एवाहं घटिष्यामि दारुणा दिव्यरूपिणा ।
इत्युक्त्वान्तर्दधे वेद्यां वृद्धवर्द्धकिरूपधृक् ॥
वञ्चनार्थं मनुष्याणां साक्षान्नारायणो विभुः ।
ततः स पृथिवीपालस्तथा कृत्वान्तरीक्षमा ॥
यदुवाच गिरां देवी तत्तत् परिचचार च ।
निर्व्ववाह स्वयं देवः क्रमात् पञ्चदशे दिने ॥
चतुर्मूर्त्तिः स भगवान् यथा पूर्व्वं मयोदितः ।
दिव्यसिंहासनगतो बलभद्रसुदर्शनैः ॥
शङ्खचक्रगदापद्मलसद्बाहुर्जनार्द्दनः ।
हलं मूषलचक्राब्जं धारयन् पन्नगाकृतिः ॥
कृष्णीकृतफणासप्तमुकुटोज्ज्वलकुण्डलः ।
सुभद्रा चारुवदना वराब्जाभयधारिणी ॥
लक्ष्मीः प्रादुर्व्वभूवेयं सर्व्वचैतन्यरूपिणी ।
सुदर्शनन्तु यच्चक्रं सदा विष्णोः करे स्थितम् ॥
शाखाग्रस्तम्भमध्यस्थं तद्रूपन्तु तुरीयकम् ॥ * ॥
निर्वृत्ते भगवद्रूपे चतुर्द्धा दिव्यरूपिणी ॥
लोकानामुपकाराय पुनराहान्तरीक्षगा ।
पटैराच्छाद्य सुदृढं नृपते ! प्रतिमास्त्विमाः ॥
स्वं स्वं वर्णं प्रापयास्तु वर्णकैश्चित्रकर्म्मिणा ।
अमूर्द्दारुस्वरूपेण दृष्टाः पापाय हेतवः ॥
गोपनीयाः प्रयत्नेन पट्टनिर्म्मासवल्कलैः ।
शिल्पिभिः कर्म्मकुशलैर्दृढमाच्छादयाग्रतः ॥
वर्षे वर्षे च संस्कार्य्या पूर्व्वसंस्कारमोचनात् ।
कृते वस्त्रविलेपन्तु स तु दिव्यचिरन्तनः ।
प्रमादाद्यदि तं लेपमपनीयेत कश्चन ।
दुर्भिक्षं मरकं राष्ट्रे सन्ततिश्चास्य हीयते ॥
नैश्चितत्वात्तथा राजन् ! कदाचिदपचारणाः ।
मनुष्यैश्च राजेन्द्र ! दृष्टाः शुभञ्चरेतवः ॥
तस्मात् सुचिरा दृष्टा महद्वैमतिविपिताः ।
नीलाद्रौ कल्पवृक्षस्य वायव्यां शतहस्ततः ॥
प्रदेशे सुमहत्स्थाने प्रासादं सुदृढायतम् ।
उत्तरे नरसिंहस्य सहस्रकरमुच्छ्रितम् ॥
कारयित्वा प्रतिष्ठाप्य तत्रैनं विनिवेशय ।
पुरा स्थितः पर्व्वतेऽस्मिन् योऽभ्यर्च्चयति माधवम्॥
नाम्ना विश्वावसुर्नाम शवरो वैष्णवोत्तमः ।
तस्य सन्ततिरेवास्य लेपनस्थापनकर्म्मणि ॥
नियुज्यतां महाराज ! भविष्यत्सूत्सवेषु च ।
ततः स नृपतिः श्रीमान् शिल्पशास्त्रविशारदान्॥
सत्कारैर्दानमानैश्च योजयामास सादरम् ।
दिने दिने सुघटितः प्रासादो ववृधे द्विजाः ॥
परितः पूर्णमास्यास्तु शुक्लपक्षे यथा शशी ॥

नारद उवाच ।

प्रवर्षं बहु राजेन्द्र ! स्थित्वा चास्मिन् चिरं भुवि ।
आराधय जगन्नाथमुपचारैर्महोत्सवैः ।
पितामहं द्रष्टुकामो गत्वा चेदन्तिकं विभोः ॥
उपदेक्ष्यति सोऽप्यस्य यात्रास्ताश्च महोत्सवाः ।
उभौ तौ दिव्ययानेन जग्मतुर्मुनिभूभुजौ ॥
प्रदक्षिणीकृत्य हरिं व्योममण्डलमध्यगम् ।
दृष्ट्वा पितामहं दूरात् स्रष्टारं जगतां नृपः ॥
अमन्यत द्विजश्रेष्ठाः साक्षाद्ब्रह्ममयं हरिम् ।
शनैः शनैर्ययौ भूपः प्रणनाम कृताञ्जलिः ॥
स्तुवन् प्रणिपतन् भूमौ वाष्पस्खलितं व्रजन् ।
जानन्नपि हि तत् कार्य्यं मागतन्नृपसत्तमम् ॥
उवाच परमप्रीत इन्द्रद्युम्नं पितामहः ।
किमर्थमागतोऽस्यत्र तद् ब्रूहि हृदयस्थितम् ॥

इन्द्रद्युम्न उवाच ।

आविर्व्वभूव भगवान् भूतभव्यभवत्प्रभुः ।
गत्वा देवं जगन्नाथं स्थापयिष्यसि च प्रभो ! ॥

ब्रह्मोवाच ।

त्वमग्रतोऽधरां गत्वा यावत् सम्भारमाहिमत् ।
करिष्यसि महाभाग ! तावदेव व्रजाम्यहम् ॥
इन्द्रद्युम्नोऽपि हृष्टात्मा दृष्ट्वा ब्राह्मीं श्रियं द्विजाः ।
आजगाम भुवं विप्रा विधिना चानुमोदितः ॥
आगत्य च जगन्नाथं चिरादुत्कण्ठमानसः ।
दण्डवत् प्रणनामासौ घनरोमाञ्चकञ्चुकः ॥
ततः क्रमात् सन्ददृशे विमानाग्रं प्रजापतेः ।
स्वर्णहंसशतैः स्कन्धैरुह्यमानं समन्ततः ॥
प्रणिपत्य जगन्नाथं त्रिः परीत्य पितामहः ।
आनन्दसिन्धुसंमग्नः सरोमाञ्चवपुः स्वयम् ॥
सस्तुत्यासौ ततो ब्रह्मा कृतस्वस्त्ययनः स्वयम् ।
ऋषिभिर्नारदाद्यैश्च विद्वद्भिर्ब्राह्मणैस्तथा ॥
प्रासादद्वारि रचिते रत्नस्तम्भेऽथ मण्डपे ।
वासयित्वाभिषेकाय सम्मुखादर्शमण्डले ॥
सुवासितै रत्नकुम्भैस्तीर्थवार्य्युपबृंहितैः ।
युक्ताभ्यां स्त्रीपुरुषयोरभिषेकं पितामहः ॥
चकार भगवान् लोकसंग्रहार्थं द्विजोत्तमाः !
ततोऽभ्यलङ्कृतान् देवान् गन्धमाल्योपशोभितान्॥
नीराजयित्वा विधिवत् स स्वयं लोकभावनः ।
रत्नसिंहासने रम्ये स्थापयामास मन्त्रतः ॥
स्थापयित्वा जगन्नाथं स्पृष्ट्वा तस्य हृदम्बुजम् ।